श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्री मेल्पत्तूर् नारायणभट्टतिरि विरचितम्

# ॥ श्रीमन्नारायणीयम् ॥

## दशक - ७१

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the Wikner font.

श्रीः

श्रीमते कृष्णाय परब्रह्मणे नमः

श्रीमते रामानुजाय नमः

# ॥ श्रीमन्नारायणीयम् ॥

## दशक - ७१

*केशिमथनवर्णनं व्योमवधवर्णनं च*

यत्नेषु सर्वेष्वपि नावकेशी केशी स भोजेशितुरिष्टबन्धुः।
त्वां सिन्धुजाऽवाप्य इतीव मत्वा सम्प्राप्तवान् सिन्धुजवाजिरूपः॥ १ ॥

गन्धर्वतामेष गतोऽपि रूक्षैर्नादैः समुद्वेजितसर्वलोकः।
भवद्विलोकावधि गोपवाटीं प्रमर्द्य पापः पुनरापतत् त्वाम्॥ २ ॥

तार्क्ष्यार्पिताङ्घ्रेस्तव तार्क्ष्य एष चिक्षेप वक्षोभुवि नाम पादम्।
भृगोः पदाघातकथां निशम्य स्वेनापि शक्यं तदितीव मोहात्॥ ३ ॥

प्रवञ्चयन्नस्य खुराञ्चलं द्रागमुं च चिक्षेपिथ दूरदूरम्।
सम्मूर्च्छितोऽपि ह्यतिमूर्च्छितेन क्रोधोष्मणा खादितुमाद्रुतस्त्वाम्॥ ४ ॥

त्वं वाहदण्डे कृतधीश्च वाहादण्डं न्यधास्तस्य मुखे तदानीम्।
तद्वृद्धिरुद्धश्वसनो गतासुः सप्तीभवन्नप्ययमैक्यमागात्॥ ५ ॥

आलम्भमात्रेण पशोः सुराणां प्रसादके नूत्न इवाश्वमेधे।
कृते त्वया हर्षवशात् सुरेन्द्रास्त्वां तुष्टुवुः केशवनामधेयम्॥ ६ ॥

कंसाय ते शौरिसुतत्वमुक्त्वा तं तद्वधोत्कं प्रतिरुध्य वाचा।
प्राप्तेन केशिक्षपणावसाने श्रीनारदेन त्वमभिष्टुतोऽभूः॥ ७ ॥

कदापि गोपैः सह काननान्ते निलायनक्रीडनलोलुपं त्वाम्।
मयात्मजः प्राप दुरन्तमायो व्योमाभिधो व्योमचरोपरोधी॥ ८ ॥

स चोरपालायितवल्लवेषु चोरायितो गोपशिशून् पशूंश्च।
गुहासु कृत्वा पिदधे शिलाभिस्त्वया च बुध्वा परिमर्दितोऽभूत्॥ ९ ॥

एवं विधैश्चाद्भुतकेळिभेदैरानन्दमूर्छामतुलां व्रजस्य।
पदे पदे नूतनयन्नसीमां परात्मरूपिन् पवनेश पायाः॥ १०॥

★★★★★★★★★★